# Shri Bharata Tatparya Sangraha Stotram

# શ્રી ભારત-તાત્પર્ય-સઙ્ગ્રહસ્તોત્રમ્

## Document Information

Text title : Shri Bharata Tatparya Sangraha Stotram

File name : bhAratatAtparyasangrahastotram.itx

Category : major_works, appayya-dIkShita

Location : doc_z_misc_major_works

Author : Appayya Dixit

Transliterated by : Rama Prakasha ramaprakashak at gmail.com

Proofread by : Rama Prakasha ramaprakashak at gmail.com

Latest update : October 12, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# શ્રી ભારત-તાત્પર્ય-સઙ્ગ્રહસ્તોત્રમ્

શ્રીબાદરાયણમુનિઃ સ્વયમેવ વિષ્ણુઃ
    પાર્થચ્છલાત્તમધિકૃત્ય કૃતે પ્રબન્ધે ।
તસ્યાપિ નિત્યમહિતં શશિભૂષણત્વાં
    આમ્રેડયન્ ગુરુરદર્શયદાદિ તત્ત્વમ્ ॥ ૧॥

મોહાભિભૂતમખિલં જગદાવિરિઞ્ચં
    ત્વામેકમેવં ભગવન્ રહિતં ચ તેન ।
વિખ્યાપ્યમઙ્ગુણક દિવ્યકથાનુષક્ત્યા
    ત્વાં બ્રહ્મતેન ચ મુનિઃ સ્ફુટયામ્બભૂવ ॥ ૨॥

સસ્માચ્ચ (તસ્માચ્ચ) મોહતદભાવકૃતાદ્વિશેષાત્
    જન્મસ્થિતિ પ્રલય ભાગખિલં ત્વદન્યત્ ।
તત્કર્તૃવસ્તુ પરમં ત્વમિતિ પ્રબોધં
    જાતં વિભાવયતિ તસ્ય તદીય વાચા ॥ ૩॥

કૈલાસશૈલશિખરે હરિપાર્થદૃષ્ટં
    ત્વાં બ્રહ્મનાથ પરમં સમુદીર્ય સાક્ષાત્ ।
તલ્લક્ષણં ત્વયમનન્યતદીય ધર્મં
    ક્રાન્તે કિયચ્ચ ભવતિ સ્ફુટમાચચક્ષે ॥ ૪॥

નારાયણસ્ય સુચિરં ત્વદુપાસકસ્ય
    યત્બ્રહ્મભાવમવદત્તવ ભાવનાપ્તમ્ ।
યત્તે સ્તુતિં તદુદિતાં પરભાવગર્ભાં
    ત્વાં બ્રહ્મ તેન ચ મુનિઃ સ્ફુટયાઞ્ચકાર ॥ ૫॥

મૂલં કૃષ્ણો બ્રહ્મ ચ બ્રાહ્મણાશ્ચેત્
    યાદાવેવં બ્રહ્મભાવં મહેશ ।
પાર્થાનાં તે નિત્યસંરક્ષકસ્ય
    વ્યાસસ્તત્રોદ્ઘાટયામાસ શમ્ભો ॥ ૬॥

બ્રહ્મા વિષ્ણુશ્શઙ્કરશ્ચેતિ દેવાઃ
    કર્તારો યે સર્ગરક્ષાલયાનામ્ ।
તેષાં સૃષ્ટિં સંહૃતિં ચ ત્વદીચ્છા
    ધીનામૂચે દ્યોતયન્ બ્રહ્મતત્ત્વમ્ ॥ ૭॥

વિશાલાક્ષસ્થાણુર્દ્રુહિણતનયઃ સંહરણકૃત્
    સરોજાક્ષક્રોધપ્રભવ ઇતિ વૈશેષિકપદમ્ ।
વિભૂતિત્વજ્ઞાસ્યૈ કિમપિનિહિતન્નાથ નિયતં
    નિકર્ષોક્તિસ્તાભ્યાં ભવતૈતિબુદ્ધિં નિરસિતુમ્ ॥

યત્રેદૃશં નાસ્તિ વિભૂતિ રુદ્રતા
    વિજ્ઞાપકં નાથ વિશેષકં પદમ્ ।
સાઽપિ સ્વધર્મ ગૃહમાનવૈશસાત્
    સર્વેશ્વરં ત્વાં નનિકર્ષગીસ્પૃશેત્ ॥ ૯॥

ગીતાસુગૂઢમુદિતં ભવતઃ પરત્વં
    નૈવસ્ફુટં તદત એવ હિ સવ્યસાચી ।
ગીથાર્થમેવ સહસાપુનરપ્યપૃચ્છત્
    તબોધનાર્થમુદિતા હરિણાનુગીતા ॥ ૧૦॥

તમેવ ચાદ્યં પુરુષં પ્રપદ્યે
    ત્યુદીરિતં યન્મધુકૈટભદ્વિષા ।
તમેવ સર્વાન્ ભ્રમયન્તમીશ્વરં
    મહાફલાસ્યૈ શરણં વ્રજેતિ યત્ ॥ ૧૧॥

એતેન કૃષ્ણસ્ય સમં મુમુક્ષુણા
    સ્વારાધનીયઃ પ્રતિભાસતે પરઃ ।
સર્વસ્ય ચાહં હૃદિસન્નિવિષ્ટે
    ત્યાદ્યૈસ્તુ વિષ્ણુઃ તદુદેતિસંશયઃ ॥ ૧૨॥

ઇત્થમસ્ય યદિ સંશયો ભવેત્
    અન્યથાગ્રહણમેવ વા પુનઃ ।
નાગ્રહીન્મદુપવિષ્ટ એવં
    ઇત્યગ્રહં હરિરવોચદુત્તરે ॥ ૧૩॥

ઉક્ત્વા ચ સંશયવિપર્યયોઃ નિરાસં

ચક્રે હરિશ્ચતુરયા દ્રુતમુક્તિભઙ્ગ્યા ।
શક્યન્તદદ્ય ન મયા ભણિતું યથોક્તં
યોગાધિરૂઢમનસા ન બહિર્દૃશેતિ ॥ ૧૪॥

અધુના તદુપાસ્ય સંશયાદ્યપગચ્છત્વિતિ સૌહૃદં સ્મરન્ ।
ઇતિ હોક્તમિહશ્રુતમ્મયેત્યુપદેશ્યે કિયદાહ તત્ર સઃ ॥ ૧૫॥

તસ્ય સ્થિરીકરણમાત્મનિ પૂર્વવૃત્તં
સ્વસ્યૈવ બુદ્ધિમનસી દ્વિજદમ્પતી ચ ।
કૃત્વાનુયોજનતદુત્તરયોરનુક્ત્વા
વિખ્યાપ્ય તદ્વિવરણં ચ ચકાર શૌરિઃ ॥ ૧૬॥

અગ્રેતત્ત્વં પરં કિં ત્વહમપિ ચ કુતઃ સર્વ ભૂતાનિ ચેતિ
પ્રશ્નેશિષ્યસ્ય તસ્મૈ ગુરુકૃતમખિલં બ્રહ્મતત્ત્વોપદેશમ્ ।
મોક્ષં શિષ્યસ્ય ચોક્ત્વાપુનરપિવિજયે નાનુયુક્તો ગુરુઃ કઃ
શિષ્યોવેતિ સ્વમેવેશ્વરગુરુમવદત્ સ્વસ્યચિત્તં સ્વશિષ્યમ્ ॥ ૧૭॥

બ્રહ્મણ્યેવં સ્વચેતો મિયમનસમુપસ્થાપિતં ગ્રન્થિમોક્ષં
સ્વેનૈવોક્તં વિમૃશ્ય પ્રપદનવચનં તત્પ્રતીતાર્થનિષ્ઠમ્ ।
યત્તત્સર્વસ્યચાહં હૃદિમુખવચનં તત્પુનશ્શાસ્ત્રદૃષ્ટ્યા
ઇત્યેવં પાર્થોઽવગચ્છેદિતિવિવૃતિરકાર્યત્ર ગીતાશયસ્ય ॥ ૧૮॥

તચ્ચ બ્રહ્મપ્રપત્યાસ્પદસુરરિપોઃ ઈશ્વરત્વં ન ચાન્યઃ
નાહં કશ્ચિત્પ્રપદ્યે વિબુધમિતિવચઃ શ્રોતુરુત્કૃષ્ટભક્ત્યૈ ।
સેવન્તે નીલકણ્ઠં પરિમિતફલદં ન પ્રબુદ્ધ્યા ઇતીદં
બ્રહ્મૈક્યધ્યાતૃ વિદ્વદ્વિષયમિતરથા નાસ્તિ ભૂયોનુરોધઃ ॥ ૧૯॥

ઇત્થં ચક્રે ભારતં યઃ પ્રબન્ધં
વ્યક્ત્યા વ્યાસશ્શામ્ભવોત્કર્ષવર્ષી ।
ધ્વન્યધ્વન્યધ્વન્ય મૂર્ધન્ય ધન્યસ્તં
શૌરિં તત્સાક્ષિણં ચાનતોઽસ્મિ ॥ ૨૦॥

ઇતિ શ્રીઅપ્પય્યદીક્ષિતવિરચિતં શ્રીભારતતાત્પર્યસઙ્ગ્રહસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Rama Prakasha ramaprakashak at gmail.com

*Shri Bharata Tatparya Sangraha Stotram*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*